# Shri Sitasahasranamastotram

# શ્રીસીતાસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : Sita Sahasranamastotram 1 from Adbhutaramayana

File name : sItAsahasranAmastotramadbhutarAmAyaNa.itx

Category : sahasranAma, devii, sItA, devI

Location : doc_devii

Transliterated by : Vishwas Bhide vrbhide at rediffmail.com

Proofread by : Vishwas Bhide, PSA Easwaran

Description-comments : Also available in Sahasranama stotrasangraha, Gita Press. See corresponding nAmAvalI

Source : adbhutarAmAyaNAntargatam adhyAya 25

Latest update : August 11, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 18, 2024

*sanskritdocuments.org*

# શ્રીસીતાસહસ્રનામસ્તોત્રમ્

Chapter 25 of Adbhutaramayana contains Sita Sahasranama by Shrirama. The gist of the episode is – A group of Maharshis visited Shrirama, after His return to Ayodhya from Lanka after killing the 10-headed Ravana, and congratulated Him. They praised Him for killing the most dreadful Ravana. On hearing this, Sita, sitting beside Shrirama, smiled mockingly. The sages were surprised at this and asked Her to explain the reason for Her behaviour. She said that killing the 10-headed Ravana is not that praiseworthy, and that Shrirama's real praise can only be made if he can kill the 1000-headed Ravana – brother of the 10-headed Ravana. As the story goes, before the marriage of Sita, a Brahmin had come to Her father's palace for Chaturmasya. Very satisfied with Sita's service, the Brahmin used to tell Her several stories. One of the stories was about this 1000-headed Ravana of Pushkara Dwipa, who had conquered all the gods and others in the three worlds. Hearing the story, Shrirama decided to kill the 1000-headed Ravana and started with all his brothers and friends like Sugriva, Hanuman, Vibhishana, etc with their armies. Ravana was so powerful that with his arrows, he drove out the entire army including the four brothers, Sugriva, Hanuman, Vibhishana and others, all of whom returned and reached their own homes in no time. There remained only Shrirama

and Sita in the Pushpaka Vimana, with gods, sages, etc. in the sky, witnessing the war below. After heavy fighting, Shrirama fell down wounded in the Pushpaka Vimana while Ravana was laughing aloud on his success. Sita then got down from the Vimana and immediately changed as Ugramurti Kali and killed Ravana and his entire army. When Shrirama was roused, he saw Kali and her troupe dancing and playing with the head of Ravana. Seeing all these, Shrirama became fearful and started praising Sita with 1008 names.

વાલ્મીકિવિરચિતે અદ્ભુતરામાયણે પઞ્ચવિંશતિ સર્ગાન્તર્ગતં
શ્રીરામકૃતં સીતાસહસ્રનામસ્તોત્રમ્ ।

બ્રહ્મણો વચનં શ્રુત્વા રામઃ કમલલોચનઃ ।
પ્રોન્મીલ્ય શનકૈરક્ષી વેપમાનો મહાભુજઃ ॥ ૧॥

પ્રણમ્ય શિરસા ભૂમૌ તેજસા ચાપિ વિહ્વલઃ ।
ભીતઃ કૃતાઞ્જલિપુટઃ પ્રોવાચ પરમેશ્વરીમ્ ॥ ૨॥

કા ત્વં દેવિ વિશાલાક્ષિ શશાઙ્કાવયવાઙ્કિતે ।
ન જાને ત્વાં મહાદેવિ યથાવદ્બ્રૂહિ પૃચ્છતે ॥ ૩॥

રામસ્ય વચનં શ્રુત્વા તતઃ સા પરમેશ્વરી ।
વ્યાજહાર રઘુવ્યાઘ્રં યોગિનામભયપ્રદા ॥ ૪॥

માં વિદ્ધિ પરમાં શક્તિં મહેશ્વરસમાશ્રયામ્ ।
અનન્યામવ્યયામેકાં યાં પશ્યન્તિ મુમુક્ષવઃ ॥ ૫॥

અહં વૈ સર્વભાવાનામાત્મા સર્વાન્તરા શિવા ।
શાશ્વતી સર્વવિજ્ઞાના સર્વમૂર્તિપ્રવર્તિકા ॥ ૬॥

અનન્તાનન્તમહિમા સંસારાર્ણવતારિણી ।
દિવ્યં દદામિ તે ચક્ષુઃ પશ્ય મે પદમૈશ્વરમ્ ॥ ૭॥

ઇત્યુક્ત્વા વિરરામૈષા રામોઽપશ્યચ્ચ તત્પદમ્ ।
કોટિસૂર્યપ્રતીકાશં વિશ્વક્તેજોનિરાકુલમ્ ॥ ૮॥

જ્વાલાવલીસહસ્રાઢ્યં કાલાનલશતોપમમ્ ।
દંષ્ટ્રાકરાલં દુર્ધર્ષં જટામણ્ડલમણ્ડિતમ્ ॥ ૯॥

ત્રિશૂલવરહસ્તં ચ ઘોરરૂપં ભયાવહમ્ ।
પ્રશામ્યત્સૌમ્યવદનમનન્તૈશ્વર્યસંયુતમ્ ॥ ૧૦॥

ચન્દ્રાવયવલક્ષ્માઢ્યં ચન્દ્રકોટિસમપ્રભમ્ ।
કિરીટિનં ગદાહસ્તં નૂપુરૈરુપશોભિતમ્ ॥ ૧૧॥

દિવ્યમાલ્યામ્બરધરં દિવ્યગન્ધાનુલેપનમ્ ।
શઙ્ખચક્રકરં કામ્યં ત્રિનેત્રં કૃત્તિવાસસમ્ ॥ ૧૨॥

અન્તઃસ્થં ચાણ્ડબાહ્યસ્થં બાહ્યાભ્યન્તરતઃપરમ્ ।
સર્વશક્તિમયં શાન્તં સર્વાકારં સનાતનમ્ ॥ ૧૩॥

બ્રહ્મેન્દ્રોપેન્દ્રયોગીન્દ્રૈરીડ્યમાનપદામ્બુજમ્ ।
સર્વતઃ પાણિપાદં તત્સર્વતોઽક્ષિશિરોમુખમ્ ॥ ૧૪॥

સર્વમાવૃત્ય તિષ્ઠન્તં દદર્શ પદમૈશ્વરમ્ ।
દૃષ્ટ્વા ચ તાદૃશં રૂપં દિવ્યં માહેશ્વરં પદમ્ ॥ ૧૫॥

તથૈવ ચ સમાવિષ્ટઃ સ રામો હૃતમાનસઃ ।
આત્મન્યાધાય ચાત્માનમોઙ્કારં સમનુસ્મરન્ ॥ ૧૬॥

નામ્નામષ્ટસહસ્રેણ તુષ્ટાવ પરમેશ્વરીમ્ ।

ૐ સીતોમા પરમા શક્તિરનન્તા નિષ્કલામલા ॥ ૧૭॥

શાન્તા માહેશ્વરી ચૈવ શાશ્વતી ૧૦ પરમાક્ષરા ।
અચિન્ત્યા કેવલાનન્તા શિવાત્મા પરમાત્મિકા ॥ ૧૮॥

અનાદિરવ્યયા શુદ્ધા દેવાત્મા ૨૦ સર્વગોચરા ।
એકાનેકવિભાગસ્થા માયાતીતા સુનિર્મલા ॥ ૧૯॥

મહામાહેશ્વરી શક્તા મહાદેવી નિરઞ્જના ।
કાષ્ઠા ૩૦ સર્વાન્તરસ્થા ચ ચિચ્છક્તિરતિલાલસા ॥ ૨૦॥

જાનકી મિથિલાનન્દા રાક્ષસાન્તવિધાયિની ।
રાવણાન્તરકરી રમ્યા રામવક્ષઃસ્થલાલયા ॥ ૨૧॥

ઉમા સર્વાત્મિકા ૪૦ વિદ્યા જ્યોતિરૂપાયુતાક્ષરા ।
શાન્તિઃ પ્રતિષ્ઠા સર્વેષાં નિવૃત્તિરમૃતપ્રદા ॥ ૨૨॥

વ્યોમમૂર્તિર્વ્યોમમયી વ્યોમધારાઽચ્યુતા ૫૧ લતા ।
અનાદિનિધના યોષા કારણાત્મા કલાકુલા ॥ ૨૩॥

નન્દપ્રથમજા નાભિરમૃતસ્યાન્તસંશ્રયા ।
પ્રાણેશ્વરપ્રિયા ૬૦ માતામહી મહિષવાહના ॥ ૨૪॥

પ્રાણેશ્વરી પ્રાણરૂપા પ્રધાનપુરુષેશ્વરી ।
સર્વશક્તિઃ કલા કાષ્ઠા જ્યોત્સ્નેન્દોર્મહિમાઽઽસ્પદા ॥ ૨૫॥ ૭૨
સર્વકાર્યનિયન્ત્રી ચ સર્વભૂતેશ્વરેશ્વરી ।
અનાદિરવ્યક્તગુણા મહાનન્દા સનાતની ॥ ૨૬॥

આકાશયોનિર્યોગસ્થા સર્વયોગેશ્વરેશ્વરી ૮૦ ।
શવાસના ચિતાન્તઃસ્થા મહેશી વૃષવાહના ॥ ૨૭॥

બાલિકા તરુણી વૃદ્ધા વૃદ્ધમાતા જરાતુરા ।
મહામાયા ૯૦ સુદુષ્પૂરા મૂલપ્રકૃતિરીશ્વરી ॥ ૨૮॥

સંસારયોનિઃ સકલા સર્વશક્તિસમુદ્ભવા ।
સંસારસારા દુર્વારા દુર્નિરીક્ષ્યા દુરાસદા ૧૦૦ ॥ ૨૯॥

પ્રાણશક્તિઃ પ્રાણવિદ્યા યોગિની પરમા કલા ।
મહાવિભૂતિર્દુર્ધર્ષા મૂલપ્રકૃતિસમ્ભવા ॥ ૩૦॥

અનાદ્યનન્તવિભવા પરાત્મા પુરુષો બલી ૧૧૦ ।
સર્ગસ્થિત્યન્તકરણી સુદુર્વાચ્યા દુરત્યયા ॥ ૩૧॥

શબ્દયોનિશ્શબ્દમયી નાદાખ્યા નાદવિગ્રહા ।
પ્રધાનપુરુષાતીતા પ્રધાનપુરુષાત્મિકા ॥ ૩૨॥

પુરાણી ૧૨૦ ચિન્મયી પુંસામાદિઃ પુરુષરૂપિણી ।
ભૂતાન્તરાત્મા કૂટસ્થા મહાપુરુષસંજ્ઞિતા ॥ ૩૩॥

જન્મમૃત્યુજરાતીતા સર્વશક્તિસમન્વિતા ।
વ્યાપિની ચાનવચ્છિન્ના ૧૩૦ પ્રધાના સુપ્રવેશિની ॥ ૩૪॥

ક્ષેત્રજ્ઞા શક્તિરવ્યક્તલક્ષણા મલવર્જિતા ।
અનાદિમાયાસમ્ભિન્ના ત્રિતત્ત્વા પ્રકૃતિર્ગુણઃ ૧૪૦ ॥ ૩૫॥

મહામાયા સમુત્પન્ના તામસી પૌરુષં ધ્રુવા ।
વ્યક્તાવ્યક્તાત્મિકા કૃષ્ણા રક્તશુક્લાપ્રસૂતિકા ॥ ૩૬॥

સ્વકાર્યા ૧૫૦ કાર્યજનની બ્રહ્માસ્યા બ્રહ્મસંશ્રયા ।
વ્યક્તા પ્રથમજા બ્રાહ્મી મહતી જ્ઞાનરૂપિણી ॥ ૩૭॥

વૈરાગ્યૈશ્વર્યધર્માત્મા બ્રહ્મમૂર્તિર્હૃદિસ્થિતા । ૧૬૧
જયદા જિત્વરી જૈત્રી જયશ્રીર્જયશાલિની ॥ ૩૮॥

સુખદા શુભદા સત્યા શુભા ૧૭૦ સઙ્ક્ષોભકારિણી ।
અપાં યોનિઃ સ્વયમ્ભૂતિર્માનસી તત્ત્વસમ્ભવા ॥ ૩૯॥

ઈશ્વરાણી ચ સર્વાણી શઙ્કરાર્દ્ધશરીરિણી ।
ભવાની ચૈવ રુદ્રાણી ૧૮૦ મહાલક્ષ્મીરથામ્બિકા ॥ ૪૦॥

માહેશ્વરી સમુત્પન્ના ભુક્તિમુક્તિફલપ્રદા ।
સર્વેશ્વરી સર્વવર્ણા નિત્યા મુદિતમાનસા ॥ ૪૧॥

બ્રહ્મેન્દ્રોપેન્દ્રનમિતા શઙ્કરેચ્છાનુવર્તિની ૧૯૦ ।
ઈશ્વરાર્દ્ધાસનગતા રઘૂત્તમપતિવ્રતા ॥ ૪૨॥

સકૃદ્વિભાવિતા સર્વા સમુદ્રપરિશોષિણી ।
પાર્વતી હિમવત્પુત્રી પરમાનન્દદાયિની ॥ ૪૩॥

ગુણાઢ્યા યોગદા ૨૦૦ યોગ્યા જ્ઞાનમૂર્તિર્વિકાસિની ।
સાવિત્રી કમલા લક્ષ્મી શ્રીરનન્તોરસિ સ્થિતા ॥ ૪૪॥

સરોજનિલયા શુભ્રા યોગનિદ્રા ૨૧૦ સુદર્શના ।
સરસ્વતી સર્વવિદ્યા જગજ્જ્યેષ્ઠા સુમઙ્ગલા ॥ ૪૫॥

વાસવી વરદા વાચ્યા કીર્તિઃ સર્વાર્થસાધિકા ૨૨૦ ।
વાગીશ્વરી સર્વવિદ્યા મહાવિદ્યા સુશોભના ॥ ૪૬॥

ગુહ્યવિદ્યાઽઽત્મવિદ્યા ચ સર્વવિદ્યાઽઽત્મભાવિતા ।
સ્વાહા વિશ્વમ્ભરી ૨૩૦ સિદ્ધિઃ સ્વધા મેધા ધૃતિઃ શ્રુતિઃ ॥ ૪૭॥

નાભિઃ સુનાભિઃ સુકૃતિર્માધવી નરવાહિની ૨૪૦ ।
પૂજા વિભાવરી સૌમ્યા ભગિની ભોગદાયિની ॥ ૪૮॥

શોભા વંશકરી લીલા માનિની પરમેષ્ઠિની ૨૫૦ ।
ત્રૈલોક્યસુન્દરી રમ્યા સુન્દરી કામચારિણી ॥ ૪૯॥

મહાનુભાવમધ્યસ્થા મહામહિષમર્દિની ।
પદ્મમાલા પાપહરા વિચિત્રમુકુટાનના ॥ ૫૦॥

કાન્તા ૨૬૦ ચિત્રામ્બરધરા દિવ્યાભરણભૂષિતા ।
હંસાખ્યા વ્યોમનિલયા જગત્સૃષ્ટિવિવર્દ્ધિની ॥ ૫૧॥

નિર્યન્ત્રા મન્ત્રવાહસ્થા નન્દિની ભદ્રકાલિકા ।
આદિત્યવર્ણા ૨૭૦ કૌમારી મયૂરવરવાહિની ॥ ૫૨॥

વૃષાસનગતા ગૌરી મહાકાલી સુરાર્ચિતા ।
અદિતિર્નિયતા રૌદ્રી પદ્મગર્ભા ૨૮૦ વિવાહના ॥ ૫૩॥

વિરૂપાક્ષી લેલિહાના મહાસુરવિનાશિની ।
મહાફલાનવદ્યાઙ્ગી કામપૂરા વિભાવરી ॥ ૫૪॥

કૌશિકી કર્ષિણી રાત્રિસ્ત્રિદશાર્ત્તિવિનાશની ॥ ૫૫॥

વિરૂપા ચ સરૂપા ચ ભીમા મોક્ષપ્રદાયિની ।
ભક્તાર્ત્તિનાશિની ભવ્યા ૩૦૦ ભવભાવવિનાશિની ॥ ૫૬॥

નિર્ગુણા નિત્યવિભવા નિઃસારા નિરપત્રપા ।
યશસ્વિની સામગીતિર્ભાવાઙ્ગનિલયાલયા ॥ ૫૭॥

દીક્ષા ૩૧૦ વિદ્યાધરી દીપ્તા મહેન્દ્રવિનિપાતિની ।
સર્વાતિશાયિની વિદ્યા સર્વશક્તિપ્રદાયિની ॥ ૫૮॥

સર્વેશ્વરપ્રિયા તાર્ક્ષી સમુદ્રાન્તરવાસિની ।
અકલઙ્કા નિરાધારા ૩૨૦ નિત્યસિદ્ધા નિરામયા ॥ ૫૯॥

કામધેનુર્વેદગર્ભા ધીમતી મોહનાશિની ।
નિઃસઙ્કલ્પા નિરાતઙ્કા વિનયા વિનયપ્રદા ૩૨૦ ॥ ૬૦॥

જ્વાલામાલાસહસ્રાઢ્યા દેવદેવી મનોન્મની ।
ઉર્વી ગુર્વી ગુરુઃ શ્રેષ્ઠા સગુણા ષડ્ગુણાત્મિકા ॥ ૬૧॥

મહાભગવતી ૩૪૦ ભવ્યા વસુદેવસમુદ્ભવા ।
મહેન્દ્રોપેન્દ્રભગિની ભક્તિગમ્યપરાયણા ॥ ૬૨॥

જ્ઞાનજ્ઞેયા જરાતીતા વેદાન્તવિષયા ગતિઃ ।
દક્ષિણા ૩૫૦ દહના બાહ્યા સર્વભૂતનમસ્કૃતા ॥ ૬૩॥

યોગમાયા વિભાવજ્ઞા મહામોહા મહીયસી ।
સત્યા સર્વસમુદ્ભૂતિર્બ્રહ્મવૃક્ષાશ્રયા ૩૬૦ મતિઃ ॥ ૬૪॥

બીજાઙ્કુરસમુદ્ભૂતિર્મહાશક્તિર્મહામતિઃ ।
ખ્યાતિઃ પ્રતિજ્ઞા ચિત્સંવિન્મહાયોગેન્દ્રશાયિની ॥ ૬૫॥

વિકૃતિઃ ૩૭૦ શઙ્કરી શાસ્ત્રી ગન્ધર્વા યક્ષસેવિતા ।
વૈશ્વાનરી મહાશાલા દેવસેના ગુહપ્રિયા ॥ ૬૬॥

મહારાત્રી શિવાનન્દા શચી ૩૮૦ દુઃસ્વપ્નનાશિની ।
પૂજ્યાપૂજ્યા જગદ્ધાત્રી દુર્વિજ્ઞેયસ્વરૂપિણી ॥ ૬૭॥

ગુહામ્બિકા ગુહોત્પત્તિર્મહાપીઠા મરુત્સુતા ।
હવ્યવાહાન્તરા ૩૯૦ ગાર્ગી હવ્યવાહસમુદ્ભવા ॥ ૬૮॥

જગદ્યોનિર્જગન્માતા જગન્મૃત્યુર્જરાતિગા ।
બુદ્ધિર્માતા બુદ્ધિમતી પુરુષાન્તરવાસિની ૪૦૦ ॥ ૬૯॥

તપસ્વિની સમાધિસ્થા ત્રિનેત્રા દિવિસંસ્થિતા ।
સર્વેન્દ્રિયમનોમાતા સર્વભૂતહૃદિસ્થિતા ॥ ૭૦॥

બ્રહ્માણી બૃહતી ૪૧૦ બ્રાહ્મી બ્રહ્મભૂતા ભયાવની ॥ ૭૧॥

હિરણ્યમયી મહારાત્રિઃ સંસારપરિવર્તિકા ।
સુમાલિની સુરૂપા ચ તારિણી ભાવિની ૪૨૦ પ્રભા ॥ ૭૨॥

ઉન્મીલની સર્વસહા સર્વપ્રત્યયસાક્ષિણી ।
તપિની તાપિની વિશ્વા ભોગદા ધારિણી ધરા ૪૩૦ ॥ ૭૩॥

સુસૌમ્યા ચન્દ્રવદના તાણ્ડવાસક્તમાનસા ।
સત્ત્વશુદ્ધિકરી શુદ્ધિર્મલત્રયવિનાશિની ॥ ૭૪॥

જગત્પ્રિયા જગન્મૂર્તિસ્ત્રિમૂર્તિરમૃતાશ્રયા ૪૪૦ ।
નિરાશ્રયા નિરાહારા નિરઙ્કુશરણોદ્ભવા ॥ ૭૫॥

ચક્રહસ્તા વિચિત્રાઙ્ગી સ્રગ્વિણી પદ્મધારિણી ।
પરાપરવિધાનજ્ઞા મહાપુરુષપૂર્વજા ॥ ૭૬॥

વિદ્યેશ્વરપ્રિયાઽવિદ્યા વિદ્યુજ્જિહ્વા જિતશ્રમા । ૪૫૩
વિદ્યામયી સહસ્રાક્ષી સહસ્રશ્રવણાત્મજા ॥ ૭૭॥

જ્વાલિની ૪૬૦ સદ્મના વ્યાપ્તા તૈજસી પદ્મરોધિકા ॥ ૭૮॥

મહાદેવાશ્રયા માન્યા મહાદેવમનોરમા ।
વ્યોમલક્ષ્મીશ્ચ સિંહસ્થા ચેકિતાન્યમિતપ્રભા ૪૭૦ ॥ ૭૯॥

વિશ્વેશ્વરી વિમાનસ્થા વિશોકા શોકનાશિની ।
અનાહતા કુણ્ડલિની નલિની પદ્મવાસિની ॥ ૮૦॥

શતાનન્દા સતાં કીર્તિઃ ૪૮૦ સર્વભૂતાશયસ્થિતા ।
વાગ્દેવતા બ્રહ્મકલા કલાતીતા કલાવતી ॥ ૮૧॥

બ્રહ્મર્ષિર્બ્રહ્મહૃદયા બ્રહાવિષ્ણુશિવપ્રિયા ।
વ્યોમશક્તિઃ ક્રિયાશક્તિર્જનશક્તિઃ પરાગતિઃ ॥ ૮૨॥ ૪૯૨
ક્ષોભિકા રૌદ્રિકા ભેદ્યા ભેદાભેદવિવર્જિતા ।
અભિન્ના ભિન્નસંસ્થાના વંશિની વંશહારિણી ૫૦૦ ॥ ૮૩॥

ગુહ્યશક્તિર્ગુણાતીતા સર્વદા સર્વતોમુખી ।
ભગિની ભગવત્પત્નીં સકલા કાલકારિણી ॥ ૮૪॥

સર્વવિત્સર્વતોભદ્રા ૫૧૦ ગુહ્યાતીતા ગુહાબલિઃ ।
પ્રક્રિયા યોગમાતા ચ ગન્ધા વિશ્વેશ્વરેશ્વરી ॥ ૮૫॥

કપિલા કપિલાકાન્તા કનકાભા કલાન્તરા ૫૨૦ ।
પુણ્યા પુષ્કરિણી ભોક્ત્રી પુરન્દરપુરઃસરા ॥ ૮૬॥

પોષણી પરમૈશ્વર્યભૂતિદા ભૂતિભૂષણા ।
પઞ્ચબ્રહ્મસમુત્પત્તિઃ પરમાત્માત્ઽઽમવિગ્રહા ॥ ૮૭॥

નર્મોદયા ૫૩૦ ભાનુમતી યોગિજ્ઞેયા મનોજવા ।
બીજરૂપા રજોરૂપા વશિની યોગરૂપિણી ॥ ૮૮॥

સુમન્ત્રા મન્ત્રિણી પૂર્ણા ૫૪૦ હ્લાદિની ક્લેશનાશિની ।
મનોહરિર્મનોરક્ષી તાપસી વેદરૂપિણી ॥ ૮૯॥

વેદશક્તિર્વેદમાતા વેદવિદ્યાપ્રકાશિની ।
યોગેશ્વરેશ્વરી ૫૫૦ માલા મહાશક્તિર્મનોમયી ॥ ૯૦॥

વિશ્વાવસ્થા વીરમુક્તિર્વિદ્યુન્માલા વિહાયસી ।
પીવરી સુરભી વન્દ્યા ૫૬૦ નન્દિની નન્દવલ્લભા ॥ ૯૧॥

ભારતી પરમાનન્દા પરાપરવિભેદિકા ।
સર્વપ્રહરણોપેતા કામ્યા કામેશ્વરેશ્વરી ॥ ૯૨॥

અચિન્ત્યાચિન્ત્યમહિમા ૫૭૦ દુર્લેખા કનકપ્રભા ।
કૂષ્માણ્ડી ધનરત્નાઢ્યા સુગન્ધા ગન્ધદાયિની ॥ ૯૩॥

ત્રિવિક્રમપદોદ્ભૂતા ધનુષ્પાણિઃ શિરોહયા ।
સુદુર્લભા ૫૮૦ ધનાધ્યક્ષા ધન્યા પિઙ્ગલલોચના ॥ ૯૪॥

ભ્રાન્તિઃ પ્રભાવતી દીપ્તિઃ પઙ્કજાયતલોચના ।
આદ્યા હૃત્કમલોદ્ભૂતા પરામાતા ૫૯૦ રણપ્રિયા ॥ ૯૫॥

સત્ક્રિયા ગિરિજા નિત્યશુદ્ધા પુષ્પનિરન્તરા ।
દુર્ગા કાત્યાયની ચણ્ડી ચર્ચિકા શાન્તવિગ્રહા ૬૦૦ ॥ ૯૬॥

હિરણ્યવર્ણા રજની જગન્મન્ત્રપ્રવર્તિકા ।
મન્દરાદ્રિનિવાસા ચ શારદા સ્વર્ણમાલિની ॥ ૯૭॥

રત્નમાલા રત્નગર્ભા પૃથ્વી વિશ્વપ્રમાથિની ૬૧૦ ।
પદ્માસના પદ્મનિભા નિત્યતુષ્ટામૃતોદ્ભવા ॥ ૯૮॥

ધુન્વતી દુષ્પ્રકમ્પા ચ સૂર્યમાતા દૃષદ્વતી ।
મહેન્દ્રભગિની માયા ૬૨૦ વરેણ્યા વરદર્પિતા ॥ ૯૯॥

કલ્યાણી કમલા રામા પઞ્ચભૂતવરપ્રદા ।
વાચ્યા વરેશ્વરી નન્દ્યા દુર્જયા ૬૩૦ દુરતિક્રમા ॥ ૧૦૦॥

કાલરાત્રિર્મહાવેગા વીરભદ્રહિતપ્રિયા ।
ભદ્રકાલી જગન્માતા ભક્તાનાં ભદ્રદાયિની ॥ ૧૦૧॥

કરાલા પિઙ્ગલાકારા નામવેદા ૬૪૦ મહાનદા ।
તપસ્વિની યશોદા ચ યથાધ્વપરિવર્તિની ॥ ૧૦૨॥

શઙ્ખિની પદ્મિની સાઙ્ખ્યા સાઙ્ખ્યયોગપ્રવર્તિકા ।
ચૈત્રી સંવત્સરા ૬૫૦ રુદ્રા જગત્સમ્પૂરણીન્દ્રજા ॥ ૧૦૩॥

શુમ્ભારિઃ ખેચરી ખસ્થા કમ્બુગ્રીવા કલિપ્રિયા ।
ખરધ્વજા ખરારૂઢા ૬૬૦ પરાર્ધ્યા પરમાલિની ॥ ૧૦૪॥

ઐશ્વર્યરત્નનિલયા વિરક્તા ગરુડાસના ।
જયન્તી હૃદ્ગુહા રમ્યા સત્ત્વવેગા ગણાગ્રણીઃ ॥ ૧૦૫॥

સઙ્કલ્પસિદ્ધા ૬૭૦ સામ્યસ્થા સર્વવિજ્ઞાનદાયિની ।
કલિકલ્મષહન્ત્રી ચ ગુહ્યોપનિષદુત્તમા ॥ ૧૦૬॥

નિત્યદૃષ્ટિઃ સ્મૃતિર્વ્યાપ્તિઃ પુષ્ટિસ્તુષ્ટિઃ ૬૮૦ ક્રિયાવતી ।
વિશ્વામરેશ્વરેશાના ભુક્તિર્મુક્તિઃ શિવામૃતા ॥ ૧૦૭॥

લોહિતા સર્વમાતા ચ ભીષણા વનમાલિની ૬૯૦ ।
અનન્તશયનાનાદ્યા નરનારાયણોદ્ભવા ॥ ૧૦૮॥

નૃસિંહી દૈત્યમથિની શઙ્ખચક્રગદાધરા ।
સઙ્કર્ષણસમુત્પત્તિરમ્બિકોપાત્તસંશ્રયા ॥ ૧૦૯॥

મહાજ્વાલા મહામૂર્તિઃ ૭૦૦ સુમૂર્તિઃ સર્વકામધુક્ ।
સુપ્રભા સુતરાં ગૌરી ધર્મકામાર્થમોક્ષદા ॥ ૧૧૦॥

ભ્રૂમધ્યનિલયાઽપૂર્વા પ્રધાનપુરુષા બલી ।
મહાવિભૂતિદા ૭૧૦ મધ્યા સરોજનયનાસના ॥ ૧૧૧॥

અષ્ટાદશભુજા નાટ્યા નીલોત્પલદલપ્રભા ।
સર્વશક્તા સમારૂઢા ધર્માધર્માનુવર્જિતા ॥ ૧૧૨॥

વૈરાગ્યજ્ઞાનનિરતા નિરાલોકા ૭૨૦ નિરિન્દ્રિયા ।
વિચિત્રગહના ધીરા શાશ્વતસ્થાનવાસિની ॥ ૧૧૩॥

સ્થાનેશ્વરી નિરાનન્દા ત્રિશૂલવરધારિણી ।
અશેષદેવતામૂર્તિર્દેવતા પરદેવતા ૭૩૦ ॥ ૧૧૪॥

ગણાત્મિકા ગિરેઃ પુત્રી નિશુમ્ભવિનિપાતિનિ ।
અવર્ણા વર્ણરહિતા નિર્વર્ણા બીજસમ્ભવા ॥ ૧૧૫॥

અનન્તવર્ણાનન્યસ્થા શઙ્કરી ૭૪૦ શાન્તમાનસા ।
અગોત્રા ગોમતી ગોપ્ત્રી ગુહ્યરૂપા ગુણાન્તરા ॥ ૧૧૬॥

ગોશ્રીર્ગવ્યપ્રિયા ગૌરી ગણેશ્વરનમસ્કૃતા ।
સત્યમાત્રા ૭૫૦ સત્યસન્ધા ત્રિસન્ધ્યા સન્ધિવર્જિતા ॥ ૧૧૭॥

સર્વવાદાશ્રયા સાઙ્ખ્યા સાઙ્ખ્યયોગસમુદ્ભવા ।
અસઙ્ખ્યેયાપ્રમેયાખ્યા શૂન્યા શુદ્ધકુલોદ્ભવા ૭૬૦ ॥ ૧૧૮॥

બિન્દુનાદસમુત્પત્તિઃ શમ્ભુવામા શશિપ્રભા ।
વિસઙ્ગા ભેદરહિતા મનોજ્ઞા મધુસૂદની ॥ ૧૧૯॥

મહાશ્રીઃ શ્રીસમુત્પત્તિ ૭૭૦ સ્તમઃપારે પ્રતિષ્ઠિતા ।

ત્રિતત્ત્વમાતા ત્રિવિધા સુસૂક્ષ્મપદસંશ્રયા ॥ ૧૨૦॥

શાન્ત્યાતીતા મલાતીતા નિર્વિકારા નિરાશ્રયા ।
શિવાખ્યા ચિત્રનિલયા ૭૮૦ શિવજ્ઞાનસ્વરૂપિણી ॥ ૧૨૧॥

દૈત્યદાનવનિર્માત્રી કાશ્યપી કાલકર્ણિકા ।
શાસ્ત્રયોનિઃ ક્રિયામૂર્તિશ્ચતુર્વર્ગપ્રદર્શિકા ॥ ૧૨૨॥

નારાયણી નવોદ્ભૂતા કૌમુદી ૭૯૦ લિઙ્ગધારિણી ।
કામુકી લલિતા તારા પરાપરવિભૂતિદા ॥ ૧૨૩॥

પરાન્તજાતમહિમા વાડવા વામલોચના ।
સુભદ્રા દેવકી ૮૦૦ સીતા વેદવેદાઙ્ગપારગા ॥ ૧૨૪॥

મનસ્વિની મન્યુમાતા મહામન્યુસમુદ્ભવા ।
અમૃત્યુરમૃતાસ્વાદા પુરુહૂતા પુરુપ્લુતા ॥ ૧૨૫॥

અશોચ્યા ૮૧૦ ભિન્નવિષયા હિરણ્યરજતપ્રિયા ।
હિરણ્યા રાજતી હૈમી હેમાભરણભૂષિતા ॥ ૧૨૬॥

વિભ્રાજમાના દુર્જ્ઞેયા જ્યોતિષ્ટોમફલપ્રદા ।
મહાનિદ્રા ૮૨૦ સમુદ્ભૂતિર્બલીન્દ્રા સત્યદેવતા ॥ ૧૨૭॥

દીર્ઘા કકુદ્મિની વિદ્યા શાન્તિદા શાન્તિવર્દ્ધિની ।
લક્ષ્મ્યાદિશક્તિજનની શક્તિચક્રપ્રવર્તિકા ॥ ૧૨૮॥

ત્રિશક્તિજનની ૮૩૦ જન્યા ષડૂર્મિપરિવર્જિતા ।
સ્વાહા ચ કર્મકરણી યુગાન્તદલનાત્મિકા ॥ ૧૨૯॥

સઙ્કર્ષણા જગદ્ધાત્રી કામયોનિઃ કિરીટિની ।
ઐન્દ્રી ૮૪૦ ત્રૈલોક્યનમિતા વૈષ્ણવી પરમેશ્વરી ॥ ૧૩૦॥

પ્રદ્યુમ્નદયિતા દાન્તા યુગ્મદૃષ્ટિસ્ત્રિલોચના ।
મહોત્કટા હંસગતિઃ પ્રચણ્ડા ૮૫૦ ચણ્ડવિક્રમા ॥ ૧૩૧॥

વૃષાવેશા વિયન્માત્રા વિન્ધ્યપર્વતવાસિની ।
હિમવન્મેરુનિલયા કૈલાસગિરિવાસિની ॥ ૧૩૨॥

ચાણૂરહન્ત્રી તનયા નીતિજ્ઞા કામરૂપિણી ૮૬૦ ।
વેદવિદ્યા વ્રતરતા ધર્મશીલાનિલાશના ॥ ૧૩૩॥

અયોધ્યાનિલયા વીરા મહાકાલસમુદ્ભવા ।
વિદ્યાધરક્રિયા સિદ્ધા વિદ્યાધરનિરાકૃતિઃ ॥ ૧૩૪॥

આપ્યાયન્તી ૮૭૦ વહન્તી ચ પાવની પોષણી ખિલા ।
માતૃકા મન્મથોદ્ભૂતા વારિજા વાહનપ્રિયા ॥ ૧૩૫॥

કરીષિણી સ્વધા ૮૮૦ વાણી વીણાવાદનતત્પરા ।
સેવિતા સેવિકા સેવા સિનીવાલી ગરુત્મતી ॥ ૧૩૬॥

અરુન્ધતી હિરણ્યાક્ષી મણિદા શ્રીવસુપ્રદા ૮૯૦ ।
વસુમતી વસોર્ધારા વસુન્ધરાસમુદ્ભવા ॥ ૧૩૭॥

વરારોહા વરાર્હા ચ વપુઃસઙ્ગસમુદ્ભવા ।
શ્રીફલી શ્રીમતી શ્રીશા શ્રીનિવાસા ૯૦૦ હરિપ્રિયા ॥ ૧૩૮॥

શ્રીધરી શ્રીકરી કમ્પા શ્રીધરા ઈશવીરણી ।
અનન્તદૃષ્ટિરક્ષુદ્રા ધાત્રીશા ધનદપ્રિયા ૯૧૦ ॥ ૧૩૯॥

નિહન્ત્રી દૈત્યસિંહાનાં સિંહિકા સિંહવાહિની ।
સુસેના ચન્દ્રનિલયા સુકીર્તિશ્છિન્નસંશયા ॥ ૧૪૦॥

બલજ્ઞા બલદા વામા ૯૨૦ લેલિહાનામૃતાશ્રવા ।
નિત્યોદિતા સ્વયઞ્જ્યોતિરુત્સુકામૃતજીવિની ॥ ૧૪૧॥

વજ્રદંષ્ટ્રા વજ્રજિહ્વા વૈદેહી વજ્રવિગ્રહા ૯૩૦ ।
મઙ્ગલ્યા મઙ્ગલા માલા મલિના મલહારિણી ॥ ૧૪૨॥

ગાન્ધર્વી ગારુડી ચાન્દ્રી કમ્બલાશ્વતરપ્રિયા ।
સૌદામિની ૯૪૦ જનાનન્દા ભ્રુકુટીકુટિલાનના ॥ ૧૪૩॥

કર્ણિકારકરા કક્ષા કંસપ્રાણાપહારિણી ।
યુગન્ધરા યુગાવર્ત્તા ત્રિસન્ધ્યાહર્ષવર્ધિની ॥ ૧૪૪॥

પ્રત્યક્ષદેવતા ૯૫૦ દિવ્યા દિવ્યગન્ધા દિવાપરા ।
શક્રાસનગતા શાક્રી સાધ્વી નારી શવાસના ॥ ૧૪૫॥

ઇષ્ટા વિશિષ્ટા ૯૬૦ શિષ્ટેષ્ટા શિષ્ટાશિષ્ટપ્રપૂજિતા ।
શતરૂપા શતાવર્ત્તા વિનીતા સુરભિઃ સુરા ॥ ૧૪૬॥

સુરેન્દ્રમાતા સુદ્યુમ્ના ૯૭૦ સુષુમ્ના સૂર્યસંસ્થિતા ।
સમીક્ષા સત્પ્રતિષ્ઠા ચ નિર્વૃત્તિર્જ્ઞાનપારગા ॥ ૧૪૭॥

ધર્મશાસ્ત્રાર્થકુશલા ધર્મજ્ઞા ધર્મવાહના ।
ધર્માધર્મવિનિર્માત્રી ૯૮૦ ધાર્મિકાણાં શિવપ્રદા ॥ ૧૪૮॥

ધર્મશક્તિર્ધર્મમયી વિધર્મા વિશ્વધર્મિણી ।
ધર્માન્તરા ધર્મમધ્યા ધર્મપૂર્વી ધનપ્રિયા ॥ ૧૪૯॥

ધર્મોપદેશા ૯૯૦ ધર્માત્મા ધર્મલભ્યા ધરાધરા ।
કપાલી શાકલામૂર્તિઃ કલાકલિતવિગ્રહા ॥ ૧૫૦॥

ધર્મશક્તિવિનિર્મુક્તા સર્વશક્ત્યાશ્રયા તથા ।
સર્વા સર્વેશ્વરી ૧૦૦૦ સૂક્ષ્મા સુસૂક્ષ્મજ્ઞાનરૂપિણી ॥ ૧૫૧॥

પ્રધાનપુરુષેશાના મહાપુરુષસાક્ષિણી ।
સદાશિવા વિયન્મૂર્તિર્દેવમૂર્તિરમૂર્તિકા ૧૦૦૮ ॥ ૧૫૨॥

એવં નામ્નાં સહસ્રેણ તુષ્ટાવ રઘુનન્દનઃ ।
કૃતાઞ્જલિપુટો ભૂત્વા સીતાં હૃષ્ટતનૂરુહામ્ ॥ ૧૫૩॥

ભારદ્વાજ મહાભાગ યશ્ચૈતસ્તોત્રમદ્ભુતમ્ ।
શ્ ૃણુયાદ્વા પઠેદ્વાપિ સ યાતિ પરમં પદમ્ ॥ ૧૫૪॥

બ્રહ્મક્ષત્રિયવિડ્યોનિર્બ્રહ્મ પ્રાપ્નોતિ શાશ્વતમ્ ।
શૂદ્રઃ સદ્ગતિમાપ્નોતિ ધનધાન્યવિભૂતયઃ ॥ ૧૫૪॥

ભવન્તિ સ્તોત્રમહાત્મ્યાદેતત્સ્વસ્ત્યયનં મહત્ ।
મારીભયે રાજભયે તથા ચોરાગ્નિજે ભયે ॥ ૧૫૬॥

વ્યાધીનાં પ્રભવે ઘોરે શત્રૂત્થાને ચ સઙ્કટે ।
અનાવૃષ્ટિભયે વિપ્ર સર્વશાન્તિકરં પરમ્ ॥ ૧૫૭॥

યદ્યદિષ્ટતમં યસ્ય તત્સર્વં સ્તોત્રતો ભવેત્ ।
યત્રૈતત્પઠ્યતે સમ્યક્ સીતાનામસહસ્રકમ્ ॥ ૧૫૮॥

રામેણ સહિતા દેવી તત્ર તિષ્ઠત્યસંશયમ્ ।
મહાપાપાતિપાપાનિ વિલયં યાન્તિ સુવ્રત ॥ ૧૫૯॥

ઇત્યાર્ષે શ્રીમદ્રામાયણે વાલ્મીકીયે આદિકાવ્યે અદ્ભુતોત્તરકાણ્ડે
સીતાસહસ્રનામસ્તોત્રકથનં નામ પઞ્ચવિંશતિતમઃ સર્ગઃ ॥ ૨૫॥

Encoded and proofread by Vishwas Bhide vrbhide at rediffmail.com
Reproofread and story by PSA Easwaran

*Shri Sitasahasranamastotram*

pdf was typeset on September 18, 2024

Please send corrections to *sanskrit@cheerful.com*